


UGC Approved Journal No. 40973

ISSN : 2393-8935

# शिक्षासन्देशः
# SHIKSHA SANDESHAH

सत्रम् – 2017-19

शिक्षासङ्कायस्य वार्षिकी पत्रिका
Annual Magazine of Faculty of Education

संयुक्ताङ्कः – 5-6

## राष्ट्रियसंस्कृतसंस्थानम्

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा 'ए' श्रेण्या प्रमाणितम्
(मानितविश्वविद्यालयः), जयपुरपरिसरः, जयपुरम्

| | | | |
|---|---|---|---|
| ३४. | न्यायशास्त्रस्य शिक्षणेऽधिगमे चोपकारकत्वम् | डा. देवदत्त सरोदे | १५२ |
| ३५. | स्वप्नविश्लेषणम् – प्राच्यपाश्चात्यमनोवैज्ञानिकस्वप्नसिद्धान्ताः | डा.रा.गा.मुरलीकृष्णः | १६० |
| ३६ | संस्कृतशिक्षकः शिक्षणकौशलानि च | डॉ. कुलदीपसिंहः | १६६ |
| ३७. | राजनीति विज्ञान में व्यावसायिक कौशल एवं दक्षता | डॉ. सीमा अग्रवाल | १७० |
| ३८. | वेदस्मृति परिप्रेक्ष्य में शिक्षा व्यवस्था | डॉ. हरिओम शर्मा | १७४ |
| ३९. | ई-लर्निंग : संस्कृत शिक्षा में सूचना एवं सम्प्रेषण प्रौद्योगिकी का प्रभाव | डॉ. अवधेश कुमार कौशिक | १७८ |
| ४०. | संस्कृताध्यापकानां क्षमतोन्नयने शिक्षणदक्षतायाः प्रभावः | डॉ. विजयकुमारदाधीचः | १८१ |
| ४१. | जैन-प्राकृतवाङ्मये शिक्षा | डॉ. अमित कुमार | १८४ |
| ४२. | शिक्षणव्यवसाये दक्षताप्राप्त्यर्थं बालमनोविज्ञानस्य महत्त्वम् | डॉ. रेखा शर्मा | १९० |
| ४३. | ज्योतिषशास्त्र की दृष्टि से व्यवसायिक दक्षता विवेचन | डॉ. सुभाषचन्द्र मिश्र | १९७ |
| ४४. | योग शिक्षा से व्यवसायिक दक्षता | डॉ. नवनीत कुमार | २०१ |
| ४५. | संस्कृतशिक्षकः व्याकरणशिक्षणविधयश्च | डॉ. पंकजपुरोहितः | २०७ |
| ४६. | संस्कृतशिक्षकाणां मूल्यांकलनसन्दर्भेषु "व्यावसायिकदक्षता" अधिकमविकासयोः परिकल्पना | डॉ. कैलाश चन्द सैनी | २१२ |
| ४७. | शिक्षकाणां व्यावसायिकदक्षतायाः संवर्धने शिक्षणप्रतिमानानां पात्रम् | डा. गणेशपण्डितः | २१६ |
| ४८. | संस्कृतशिक्षणे मूल्यांकन विधिविषयकानुसन्धानस्य आवश्यकता | हरिप्रसादमीणा | २१९ |
| ४९. | शिक्षाशास्त्रं व्यावसायिकदक्षता च | राजेन्द्रप्रसाद रैगरः | २२३ |
| ५०. | संस्कृतशिक्षा व्यावसायिकदक्षता च | ओम प्रकाश वर्मा | २२६ |

# संस्कृतशिक्षणे मूल्यांकनविधिविषयकानुसन्धानस्य आवश्यकता

डॉ. हरिप्रसादमीणा

व्यावसायिकप्रवृत्तिप्रधाने आधुनिकयुगेऽस्मिन् जनानां मनसि संस्कृते उद्योगविषयमाधारीकृत्य महत् प्रश्नवाचकचिह्नं दृश्यते अत एव संस्कृत छात्राणां संख्या सर्वत्र अत्यन्तम् अल्पीयसी। उदाहरणरूपेण २०१५ तमे वर्षे सी.बी.एस.ई. परीक्षायां द्वादश्यां कक्ष्यायां केवलम् एक एव छात्रः परीक्षाम् अलिखत। इत एव ज्ञायते यत् संस्कृतपठितृणां संख्यायां कियत् ह्रासः जायमानः वर्तते। यद्यपि तत्र केवलं उद्योगः एव एकं कारणम् इति न। उत्तमानां प्रशिक्षितानां निष्ठावतां च शिक्षकाणाम् अभावः, शिक्षणे विशिष्टानां योग्यविधीनां च चयनम् अकृत्वा पाठनम्, विशेषतश्च मूल्याङ्कने केवलानां प्राचीनविधीनामेव प्रयोग इत्यादयः नैकाः समस्याः अपि अत्र कारणीभूताः। विशिष्य अध्यापनः सम्यक् न भवति चेत् अध्याप्यमाणविषयम् अध्येता न कदापि अधिगन्तुं शक्नोति। तेन शिक्षणम् साफल्यं न भजते।

अपि च शिक्षणे यावन्महत्त्वं शिक्षणविधेः वर्तते तावदेव महत्त्वं मूल्याङ्कनविधीनामपि। यदि शिक्षणस्य मूल्याङ्कनं सम्यक् न भवति चेत् कृतस्य अध्यापनकार्यस्य परिणामः अवगन्तुं न शक्यते। मूल्याङ्कनाभावे कृतमपि विफलमेव इत्यत्र नास्ति संशयः। वस्तुतः मूल्याङ्कने हि शिक्षणस्य आधारभूतं तत्त्वं वर्तते इदं हि शिक्षकस्य कृतेऽपि दर्पणवद् भवति येन शिक्षकः आत्ममूल्याङ्कनं कर्तुं प्रभवति।

संस्कृतशिक्षणे प्रायः मूल्याङ्कनस्य प्राचीनाः विधयः प्रचलिताः आसन्। सम्प्रति विशिष्य बृहन्नगरेषु शिक्षाशास्त्रिभिः नैके विधयः संस्कृतशिक्षणमूल्याङ्कने उपयुज्यमानाः सन्ति। ताः नूतनाः विधयः संस्कृतशिक्षणे कियत्परिमितं प्रभावोत्पादनं कर्तुं प्रभवन्ति, के विधयः संस्कृतशिक्षणकाले महादुपकारकाः भवन्ति इत्यस्मिन् विषये सम्प्रति महतः अनुसन्धानस्य आवश्यकता वर्तते॥

यद्यपि १४ जुलाई १९६४ तमे दिनाङ्के प्रो. दौलतसिंहकोठारीवर्यस्याध्यक्ष्ये नियोजितस्य कोठारी-आयोगस्य परीक्षणविषयस्तु शिक्षायाः राष्ट्रियस्वरूपस्य, शैक्षिकविकासस्य समस्यानां च सर्वविधपक्षाणाम् अध्ययनं विधाय सर्वकाराय परामर्शप्रदानम् आसीत्। तथापि अनेनायोगेन शिक्षायाः संरचना, अध्यापकशिक्षा अध्यापकानां स्थितिः शास्त्रीयभाषाणाम् अध्ययनाय उच्चशिक्षाकेन्द्राणां स्थापनादिविषयैः सह एव मूल्याङ्कनस्य अपि महन्महत्त्वं सम्यक् प्रतिपादितम्।

शिक्षणदृष्ट्या किन्नाम मूल्याङ्कनम् इति प्रश्ने कृते सति छात्राणां शैक्षिकोपलब्धिः यदा अङ्केषु प्रदर्श्यते तदा सा प्रक्रिया मापनम् इति सर्वे अङ्गीकुर्वन्ति। यदा हि छात्राणां प्राप्ताङ्कानामाधारेण